# तान्त्रिकवाङ्मये चैतन्यम्

डॉ. राधेश्यामचतुर्वेदी

किंनाम तन्त्रम् - तन्त्रशब्दः विस्तारस्यबोधकः । तनु विस्तारे इति धातोः 'अल्' अथवा 'ष्ट्रन्' प्रत्यये कृते तन्त्रशब्दस्य निष्पत्तिभवति । एष च विस्तारो जीवापरनामधेयस्य सङ्कुचित शिवस्य भवति । परमशिवः स्वेच्छया स्वस्वा-तन्त्रयेणात्मानं सङ्कुचितं कृत्वा जडचेतननानारूपैः स्फुरति । पश्चाच्चानेकै-रुपायैरात्मन आवरणमपसार्य स्वं विस्तारयति पूर्णरुपतां वा प्रापयति । यया प्रक्रियया परमशिवः आत्मानं विश्वरुपेणोत्ल्लासयति पश्चाच्च स्वकीये रुपे स्वस्थो भवति सैव प्रक्रिया तन्त्रशास्त्रस्य वर्ण्यविषयः। तन्त्रमात्मदर्शनस्यै-काव्यवस्थाऽस्ति । इदमेकोराजपथः, एकाकला, एका वा वैज्ञानिकीविधिर्या द्रुतगत्या आत्मसाक्षात्कारं सम्पादयति पूर्णाहन्तां च प्रापयति । यद्यपि तन्त्रमेकं स्वतन्त्रं वर्ण्यवस्तु भूतं तथापीदं मध्यवर्त्तीबिन्दुः। अस्मात्पूर्वं मन्त्रः पश्चाच्च यन्त्रमास्ति । इमानि मन्त्रतन्त्रयन्त्राणि परस्पराग्रितानि । एकस्याभावे इतरद्द्वयमपूर्णम् । को नाम मन्त्रः ? - इति जिज्ञासायां यद्यपि मननात्त्राणनाच्च मन्त्रः - इति मन्त्र शब्दस्य व्युत्पत्तिः सर्वजनप्रसिद्धा तथाप्यद्यत्वे मन्त्रशब्दस्यार्थोऽस्ति सूत्रम् - फार्मुला - । मन्त्राः सूत्ररूपाः पदार्थानां मूलस्वरुपस्य विज्ञापयितारः । पदार्थानां मूलस्वरूपं ज्ञात्वा तेषां संयोगेन मिश्रणेन वा संभाव्य स्थितीनां ज्ञानं तन्त्रमित्युच्यते। अस्य संयोगस्य मिश्रणस्य वा अङ्कैरक्षरै रेखामिश्च चित्रणं यन्त्रमित्यभिधीयते । परमतत्त्वमेकं ज्ञानातीतं निष्कलं निर्भिन्नमवाच्यं चास्ति । तद् यदा स्वेनैवैश्वर्येण ज्ञानमयीमवस्थामासादयति तदा मन्त्र इत्युच्यते । इयं च ज्ञानमयी अवस्था यदा क्रियारुपतामाप्नोति तदा सा तन्त्रमित्यभिधीयते । मन्त्रेषु वर्णसमुदायरूप पदानां प्राधान्यं भवति तन्त्रे च क्रियायाः । मन्त्राणां जपेन शरीरस्थकोशा विकसिता भवंति । एतद्विकासद्वाराऽर्जित शक्त्या साधकः चक्राणां (मूलाधारादीनाम्) भेदनं करोति। एतस्मिन् कार्ये प्रतीकरूपं यन्त्रं सहायकं भवति ।

तन्त्रस्य अस्ति पक्षद्वयम् - (१) लौकिकमथवा व्यावहारिकम् (२) अलौकिकमथवाऽऽध्यात्मिकम्। विश्वविस्तारस्य माध्यमेन प्रवृत्तेरवाच्यसत्तायाश्च ज्ञानं पश्चाच्च तस्यः प्रकृतेः मानवानां हितायोपयोगः तन्त्रस्य त्नौकिकः पक्षः । विश्वविस्तारं परिज्ञाय तस्य मूलस्य अन्वेषणं तन्त्रस्याध्यात्मिकः पक्षः । वेदा निवृत्तिपराः अतएव ते केवलं मुक्तये साधकतां भजन्ति । धर्मार्थकामास्तेषामानुषङ्गिकं लक्ष्यं मुक्तिश्च परमं फलम्। तन्त्रशास्त्रं प्रवत्तिनिवृत्युभयफलम् । प्रवत्तिद्वारा तद् व्यक्ते समाजस्य वा हितं सम्पादयति। निवृत्तिद्वारा समस्ते विश्वस्मिन् एकत्वस्याद्वितीयत्वस्य वा दर्शनं तेन च तादात्म्यस्थापनं तन्त्रस्य परा कोटि.।

तन्त्रमन्वेषणस्य एका पद्धतिः । विज्ञानमप्यन्वेषणं करोति किन्तु तद् बाह्योपकरणद्वारा बाह्यतंन्त्रस्यान्वेषणाय चिन्तयति । यावान्वा एष बाह्यः संसारास्तावानेवायमाभ्यन्तरः संसारः। तन्त्रमन्तर्जगतः अन्वेषणाय यतते । विज्ञानं जडमन्विष्यति तन्त्रं तु चेतनम् । इदं च चेतनं सर्वव्यापि, 'ब्रह्म' 'परमशिवः' 'परमाशक्तिः' इत्यादि नामभिर्व्यवह्रियते । संसारेऽस्मिन् तन्त्रद्वयमुपलभ्यते - 'तत्' च 'अहम्' च । एकः प्रथमपुरुषः पूर्णः द्वितीयश्च उत्तमपुरुषोऽपूर्णः। तौ आपाततः भिन्नौ प्रतिभातः । पारमार्थतस्तु तौ द्वावप्येकमेव । वस्तुतः 'तत्' एव 'अहम्' रूपेण स्फुरन्नास्ते । तत् पदार्थः कया रीत्या केनप्रकोण वा अहंरूपेण स्फुरितः इत्यस्य ज्ञानम्, अहम् च केन प्रकारेण कया पद्धत्या वा तत् पदार्थेन समाविष्टः तद्रूपो भविष्यति इति प्रक्रियाया अनुसन्धानमेव तन्त्रशास्त्रस्य प्रतिपाध्यम्। संस्कृतभाषाया अनुस्वारः बिन्दुर्वा (.) तन्त्रसम्मतपरमतत्त्वस्य प्रतीकभूतः द्वौ बिन्दू विसर्ग इति (:) कथ्यते। अयंविसर्गः शिवशक्त्योयामलावस्थायाः प्रतीकः। अयमेव सृष्टेः प्रारम्भः । यदा बिन्दुद्वयाद् बिन्दुत्रयस्य स्थितिर्भवति तदा त्रिकोणं जायते। इदं त्रिकोणं द्विविधम् - शिवत्रिकोणम् शक्तित्रिकोणं च । त्रिकोण द्वयस्य यामलावस्था षट्कोणं भवति। इदं षट्कोणचक्रं शिवशक्त्योः सनातन सम्बन्धस्य प्रतीकः। अस्मिन् जगति सर्वेस्त्रीपुरुषाः शक्तिशिवयोः प्रतीकभूताः। किं बहुना प्रत्येकशरीरे शिवांशः शक्त्यंशश्च विद्यमानौ स्तः । शरीरेऽस्मिन् मज्जाशुक्रप्राणजीवाः शिवमूलकाः, अस्थिचर्मरक्तमांसभेदसश्च शक्तिमूलकाः । 'यथा पिण्डे तथा ब्रह्माण्डे' इति सिद्धान्तमनुसृत्य ब्रह्माण्डेऽपीयमेव

स्थितिः । प्रवृत्तिमहदहं- कारपञ्चतन्मात्राणि पञ्चमहाभूतानि शक्तिमूलकानि । माया शुद्धविद्या ईश्वर सदाशिवाः शिवमूलकतत्वानि सन्ति । तन्त्रशास्त्रस्य तत्त्वसमूहस्य सर्वाङ्गीणं परिचयं ददाति। तन्त्राणामावरणं भिन्दन् साधकः शुद्धविद्यादीनतिक्रम्य बिन्दु-अर्धचन्द्र - रोधिनी नाद - नादान्त - शक्ति - व्यापिनी - समनापर्यन्तं रहस्यभेदनं कृत्वा उन्मनामधिगम्य तदहमोर्भेदमपसारयन् शिवसमावेशं लभते । इदमेव तन्त्रं तन्त्रशास्त्रस्य प्रतिपाद्यं वाऽभि धीयते ।

किं नाम चैतन्यं - चिती संज्ञाने इत्यस्माद् धातोः ल्युट् प्रत्यये कृते चेतन शब्दो निष्पन्नो भवति । चेतनस्य भावः चैतन्यम् इत्यत्र चेतनशब्दात् ष्यञ् प्रत्ययः । चैतन्यं ज्ञानमित्यनर्थान्तारं । निगमागमयोरुभयत्र चैतन्यस्य चर्चा चलति । निगमे अथवा वेदे अर्थादुपनिषत्सु चैतन्यमात्मशब्देन[१] ब्रह्मशब्देन[२]वा व्यवहृतो दृश्यते। उपनिषदः भारतीय दर्शनस्य विशेषतयाऽऽस्तिक दर्शनस्य मूलभूताः । किं बहुना नास्तिक दार्शनिक्या ? अपि स्वमत प्रमाण्यायोपनिषद्वाक्यानि तत्र तत्र उदाहरन्ति। सर्वेष्वपि दर्शनेषु चैतन्यस्य सत्ता भिन्न भिन्न रूपेण स्वीकृता । अत्र चैतन्यविषये तत्तद्दार्शनिकानां भवति निरुपणमनावश्यकं नेत्यालोच्य चार्वाकादीनां मतमनुसृत्य चैतन्य स्वरूप संक्षेपेण प्रस्तूयते ।

तत्र चार्वाकमते आकाशो नाम नैव कश्चन पदार्थः । पृथिव्यादि चत्वारि एव भूतानि। यथा गोमय मृत्तिका जलसंयोगाद् वृश्चिको जायते, यथा वा किण्वादिभ्यो मदशक्तिः तथैव पृथिव्यादिचतुर्भ्यो भूतेभ्यः विशिष्टमात्रया संश्लिष्टेभ्य चैतन्यमुपजायते। एतच्च चैतन्यमनित्यम् । देहेन सहोत्पद्यमानं देहेनैव सह विनश्यति। प्रमाण स्वरूपं ते चार्वाकाः बृहदारण्यकवाक्यमुदाहरन्ति - विज्ञान घन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञाऽस्ति (बृ.उ- २.४.१२) । एतच्चैतन्यं नूतनं नूत्नं वारं वारमुत्पद्यते इति उत्पादविनाशशालि । अथ बौद्धाः - माध्यमिकान् विहाय योगाचाराः सौत्रान्तिका वैभाषिका सर्वेऽपि चैतन्यस्य सत्तां स्वीकुर्वते । तेषां मते विज्ञानमेव चैतन्यम्। तन्मूलतः एकमेव किन्त्वविद्यया द्विविधम् - आलयविज्ञानं प्रवृत्तिविज्ञानं च[३] । तत्र 'अहम्' 'अहम्' इति बोध आलयविज्ञानम् । एतदतिरिक्तं

सर्वं प्रवृत्तिविज्ञानम्। उभयात्मकं च विज्ञानं क्षणिकमर्थात् द्वितीयक्षणवृत्तिध्वंस-प्रतियोगि। एतेषां मते चैतन्यं विज्ञानं मनः प्रज्ञप्तिरित्यनर्थान्तरम् । जगति प्रतीयमानानि समस्तानि वस्तूनि विज्ञानस्यैव प्रत्ययाः । 'चैतन्यलक्षणो जीवः' (षड्दर्शनसमुच्चय, कारिका ८४) इति ब्रुवाणा आर्हताः चैतन्यम् जीवनाम्ना व्यवहरन्ति । एष जीवः वस्तूनि जानीतः, व्यवहरति, कर्मणां भोक्ता, शरीरादभिन्नः, स्वप्रकाशः। नित्यत्वेसति परिणामित्वमस्य धर्मः। मध्यमपरिमाणवानयं संकोचविकासशालित्वाद्[४] गजशरीरे गजमात्रः पिपीलिकाशरीरे च पिपीलिका मात्रः। प्रत्यक्षानुमानाभ्यां स्वसंवेदने चास्य ज्ञानं कर्त्तुं शक्यते।

अथेदानीमास्तिकदर्शनानुसारं चैतन्यशरीरमुपवर्ण्यते - तत्र न्यायवैशेषिकनये आत्मनश्चतुर्दशगुणेषु बुद्धिरेको गुणः। बुद्धिश्च चैतन्यस्य नामान्तरम् । एतच्चैतन्यम् नात्मनः स्वाभाविकोधर्मः किन्तु आगन्तुको वा । नित्योविभुश्चात्मा यदा शरीरबद्धेन जगति वर्त्तमानो भवति तदा तस्मिन्नात्मनि चैतन्यमुपजायते । देहान्ते चात्मनः सकाशात् पृथग्भूय विलीयते। अत एव मुक्तिदशायामात्मा चैतन्यरहितः काष्ठपाषाणादिवत् निःसंज्ञस्तिष्ठति । सांख्ययोगमते शरीरेन्द्रिय मनोभ्यो भिन्नः स्वतन्त्रः स्वस्थः स्वच्छः पुरुष एव चैतन्यम् । अयं च ज्ञातैव न कदाचित् ज्ञानविषयः । न्यायनये चैतन्यमात्मन आगन्तुको गुणः किन्तु सांख्ये राद्धान्ते चैतन्यं पुरुष इत्यनर्थान्तरम् । चैतन्यम् पुरुषस्य स्वभावः । य एव पुरुषः स एव चैतन्यम्, यदेव चैतन्यम् तदेव पुरुषः । 'साक्षी चेता केवलो निर्गुणश्च' । एतच्च चैतन्यं कूटस्थनित्यं, व्यापकमपरिणामि दृक्शक्तिः । अथ मीमांसकाः - तत्र कौमारिला कथयन्ति यत् आत्मनि चिद् अचिद् इत्यंशद्वयम् । तत्र चिदंश एव चैतन्यम् । एतेषांमते चैतन्यमात्मनो गुणः स च कादाचित्कः । यदा शरीरेण विषयस्य संयोगो भवति तदा चैतन्यमुपजायते । अत एव स्वप्ने सुषुप्तौ च आत्मा चैतन्यरहितो जडः सन्मात्रस्तिष्ठति । वेदान्तिनां मते ब्रह्म आत्मा सत्यं ज्ञानं चैतन्यं अनन्तं आनन्दः मोक्षः इत्येते शब्दा अपरपर्यायाः। अत्र नानाश्रुतिवचानानि[५] प्रमाणानि। एतच्चैतन्यं नानावच्छेदेन नानारूपाणि धृत्वा जगति नाना रूपेण भासते । तद्यथा - अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्; अन्तःकरणवृत्यवच्छिन्नं चैतन्यं प्रमाण चैतन्यं; विषयावच्छिन्नं चैतन्यं विषय चैतन्यं । अन्तःकरणं तद्वृत्तयो विषयाश्च

सर्वाणि मूलतः चैतन्यमेव सन्ति किन्त्वनाद्यविद्यावशादन्तःकरणादिरूपेण विवर्त्तते । चैतन्यस्य विषये उपर्युक्ताः सर्वेऽपि विचाराः खण्डदृष्टयः । सङ्कुचितदृष्टयो वा सन्ति । यथा केचन सङ्कुचितदृष्टयः पुरुषाः गजस्य समीपं गताः सन्तः पृष्टाः - कीदृशोगजः ? इति । एवं पृष्टे येन गजस्य पादः स्पृष्टः स होवाच - स्तम्बवत् इति । येनकर्णस्पृष्टं स उदतीतरत् - न हि, सर्पवत् इति । यः शुण्डंस्पृष्टवान् तेनोक्तं - नहि , अधोभागे संकीर्णमुपरिभागे विस्तीर्णं हि दृश्य म्संयुतं स्थूल दण्डवत् इति । इत्थं सङ्कुचितदृष्टिभिः पुरुषैः गजस्य वर्णनं यथार्थं सदपि सर्वथा समीचीनं पूर्णं च नास्ति तथैवोपरि वर्णितानि नानादार्शनिकमतानि यथार्थानि सन्त्यपि अपूर्णानि अतस्तेषाम् खण्डदृष्टीनां परिचायकानि । चैतन्यस्य विषये तन्त्रशास्त्रीयं मतं सर्वतः सर्वथा परिपूर्णम् ।

शैवतन्त्रे शाक्ततन्त्रेवा चैतन्यस्य सत्ता ऐकमत्येन स्वीकृता । 'चैतन्यमात्मा' इति प्रथमं शिवसूत्रम् । चितिः स्वतन्त्रा विश्वसिद्धिहेतुः इति प्रत्यभिज्ञा हृदयोक्तं प्रथमं शाक्तसूत्रम् । एतच्चैतन्यं परमशिवः परमाशक्तिः वा इति तान्त्रिकाणां विचारः । यद्यपि तच्चैतन्यमेकमलिङ्गं चास्ति[६] तथापि व्यवहारदृष्या आस्थामनुसृत्य वा तस्य विषये पुल्लिङ्ग स्त्रीलिङ्ग व्यवहाराः प्रचलन्ति । वस्तुतस्तु तस्यरूपं सर्वोपाधिविवर्जितम्[७]। यथोक्तं विज्ञानभैरवे -

चिद्धर्मा सर्वदेहेषु विशेषो नास्ति कुत्रचित् ।
अतश्च तन्मयम् सर्वं भावयन् भवजिज्जनः ॥ (वि.भै.)

चैतन्यं चितिः इत्यत्र एकवचनं अस्य तत्त्वस्य देश कालाध्यन-वच्छिन्नतामद्वैतत्वं च ब्रूते । यथोक्तम् -

इदं द्वैतमिदं नेति तदिदंच द्वयाद्वयम् ।
इति यत्र समंभाति तदद्वयमुदाहृतम् ।

इदं सत्तात्मकं चैतन्यमखण्डप्रकाशस्वरुपम् । महेश्वरोक्त प्रथमसूत्रस्य, 'अ इ उण्' इत्यस्य 'अकारः' अनुत्तरं संकेतयति । चैतन्यमेवानुत्तरम् । एतच्चैतन्यं सर्वोत्तीर्णं सर्वमयमित्युभयथा वर्त्तते । सन्मात्रमिदं पूर्णतत्त्वं प्रकाशस्वभावम् । अस्यैतादृश्यां गभीरायां स्थितौ सत् चित् आनंदस्य कल्पनाऽपि कर्त्तुं न पार्यते । इयमस्य निरंशा

निर्विशेषा च स्थितिः सन्मात्रस्वभावा । स्वप्रकाशस्य एतस्यामेव स्थितौ अस्या एव परमसत्ताया एकाकला प्रस्फुटी भवति या तान्त्रिकैः चित् अथवा चितिः इति कथ्यते। अयंचिद् भावश्चैतन्यं वा तस्य परमेश्वरस्य बहिरुन्मुखतायाः प्रथमः प्रकाशः । अस्या बहिरुन्मुखताया मूलं तस्य विमर्शनाम्नी शक्तिरस्ति । विमर्शं विना स नैवाभासितुं शक्नोति । विमर्शः प्रकाशस्य स्वभाव एव -

स्वभावमवभासस्य विमर्शं विदुरन्यथा ।
प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादि जडोपमः ॥

इमौ प्रकाशविमर्शौ अग्नितद्दाहकताशक्त्योरिवाविनाभावेन तादात्म्येन वा स्थितौ । एकेन विनाऽपरस्य अस्तित्वमपि कल्पयितुं न शक्यते । एतस्य विमर्शस्यैवेदं फलं यत् परमसत्ता बहिरुन्निनायिषति । यथा परमासत्ताऽनादिर्नित्या निरुपाधिस्तथैव तस्याश्चिद्भावोऽपि निरुपाधिर्नित्यः । अयं चिद्भावस्तस्मात् सतः शश्वन्निरच्छिन्नास्ते। एतस्य कारणमस्ति स्पन्दनम् । स्पन्दनस्य स्वरूपं यथा -

यदमनुत्तरमूर्त्तिर्निजेच्छया विश्वमेषितुं स्रष्टुम् । पस्पन्दे स स्पन्दः .........॥

तथा -

स्पन्दनं च किंचिच्चलनम् । एषैव च किंचिद्रूपता यदचलमपि चलमाभासते। प्रकाशस्वरूपं हि मनागपि नातिरिच्यते अतिरिच्यत इवेति अचलमेवाभासभेदयुक्तमेव च आभाति । (ई.प्र.वि. १.५.१४)

अखण्डसत्तातश्चिद्भावः शश्वद् बहिर्निर्गच्छन्नास्ते इति पूर्वमुक्तम् । स्पन्दकारणाद् यथा सतश्चैतन्यं बहिर्भवति तथा चैतन्येपि स्पन्दनं शश्वद् भवदास्ते। एतत्स्पन्दनस्य परिणामोऽयं यत् चैतन्यमेकतः सता संश्लिष्टो भवति अपरतस्तस्माचैतन्याद् द्वितीयं चैतन्यं प्रादुर्भवति । इदं द्वितीयम् चैतन्यं यदा प्रथमे चैतन्ये प्रतिबिम्बितं भवति तदा स्वकीयं रूपं तत्र पश्यति । प्रथम चैतन्यस्य या सत्ता तस्या इदमेव वेदनं प्रत्यभिज्ञानं वा आनन्द इति नाम्नाऽभिधीयते । यथा स्थूले जगद्व्यवहारे प्रतिबिम्बस्य दर्शनार्थं दर्पणस्यावश्यकता भवति तथैवेदं चैतन्यमपि बिम्बप्रतिबिम्बोभयरूपेण भासमानं वर्तते । एतावता इदमायातं यत् या अखण्डसत्ता

सा नित्या सती चित्स्वरूपा चित्स्वभावा च । अर्थात् यदेव सत् तदेव चित् यदेव च चित् तदेव सत् । इयं चिन्मयीसत्ता स्वतन्त्रा अर्थात् अन्यनिरपेक्षा । 'चितिस्वतन्त्रा विश्वसिद्धिहेतुः' इति सूत्रे स्वतंत्र शब्दस्यायमेव परमार्थः । सत्यं शिवं सुन्दरं अथवा सच्चिदानन्दपदैरेतस्या एव सत्ताया अभिव्यक्तिर्भवति । यदिदं विशुद्धं सत् तत् अभिव्यक्तिदृष्ट्या चित्, रसास्वाददृष्ट्या च आनन्द इति ज्ञायते । इदमेव शैवानां परमाशिवः शाक्तानां च परमा शक्तिः । यद्यपि पूर्वदौक्तमतवादिनां नये अनयोः शेषशेषिभावः । शिवः शेषी अर्थात् अङ्गी शक्तिश्च शेष अर्थादङ्गम् । किन्तूत्तरकौलानां मते इदमनुचितम् । नानयोः शेषशेषिभावः । युक्तं चैतत् । गजवृषभन्यायेनदं[८] शिवोऽप्यस्ति शक्तिरपि । शक्तिं विना शिव इच्छाज्ञानरहितः स्वप्रकाशने असमर्थः शव इव भवति । सौन्दर्यलहरीग्रन्थे[९]ऽस्य संकेतोलभ्यते । एवमेव प्रकाशात्मक शिवंविना शक्तिरप्यात्मा प्रकाशने असमर्था । उभयमपि चिद्रूपम् । यथा अग्निस्तस्य दाहकताशक्तिश्चाभिन्ने एवमेव शिवशक्ती द्वावप्येकमेव । इदमेव परमं साम्यमद्वैतभावो वा । एतस्यैव विषये उक्तम् - 'निरञ्जनः परमं साम्यमुपैति'[१०] । यद्यपि अत्र नास्ति लिङ्गभेदः[११] तथापि भेददृष्ट्या शिवांशः सन्नपि चित्स्वरूपः निष्क्रियः साक्षी[१२] च । शक्त्यंशश्च सर्वदा पञ्चकृत्यकारी । इयं चित्सत्ता एकतः पूर्णतया रिक्ता शून्या विश्वोत्तीर्णा शिवस्यरूपा, अपरतः पूर्णतया पूर्णा विश्वमयी शक्तिरूपा । एतेनेदमायातं यत् परमाशक्तिः परमाशिवश्चेत्युभयमपि नित्याचिन्मात्र स्वभावं नित्यमुक्तं च । संस्कृतसाहित्येऽर्द्धनारीश्वरस्यकल्पना एनमेव भावं द्योतयति । तत्र शिवः शक्तिश्चोभावपि शश्वद्विद्यमानौ भवतः । एतस्मादेव कारणात् विश्वस्याभेदेन भानं भवति । यतो हि लीलामयी महाशक्तिमतिरिच्य अन्यत् किमपि नास्ति ।

'चितिः स्वतन्त्रा विश्वसिद्धिहेतुः' इति सूत्रे चितिः स्वतन्त्रा इत्युभयमपि पदं प्रथमान्तम् । 'नानार्थयोरभेदातिरिक्तः सम्बन्धोऽव्युत्पन्नः' । इति नीत्या चैतन्यस्वातन्त्रययोरभेदः सम्बधः । यदेव चैतन्यम् तदेव स्वातन्त्र्यं यदेव च स्वातन्त्र्यं तदेव चैतन्यम् । चितिमतिरिच्य सर्वं परतन्त्रमेव । यत्किञ्चिद् दृश्यतेऽनुभूयते ज्ञायते विमृश्यते तत्सर्वं तस्य चैतन्यस्य स्वातन्त्र्यमेव । एष स्वातन्त्र्यसिद्धान्तः शैवागमस्य शाक्तागमस्य वा प्राणभूतः । चिन्मयी सर्वोच्च सत्ता परमाशिवः परमाशक्तिर्वा

परमस्वतन्त्रा । स्वस्वातन्त्र्यादेवेयं सत्ता सर्वदा चिद् आनन्द इच्छा ज्ञान क्रियेति पञ्चभिः शक्तिभिर्युक्ता विराजते । चैतन्यं तस्य सत्तात्मक परमेश्वरस्य अन्तरङ्गा शक्तिः आनन्दश्च बहिरङ्गा । कौलाचार्यास्तां सत्तां विश्वमयीं मन्यन्ते तन्त्राचार्यस्तु विश्वोत्तीर्णाम् । किन्तु भिन्नदार्शनिकानाम् अर्थात् काश्मीर शिवाद्वयवादिनां मते सा सत्ता विश्वमयी विश्वोत्तीर्णा च एकसहैव वर्त्तते । एतदेव तस्याः स्वतन्त्र्यम् । निखिलमेव विश्वं तस्या स्वातन्त्र्यस्यैव क्रीडा अभिनयो वा । स्वस्वातन्त्र्यवशात् सा विश्वरूपं नाटकं रचयति । तदुक्तम्-

स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति[१३] । इति ।

तन्नानां अनुरूपग्राह्यग्राहकभेदात्[१४] । इति च ।

विश्वरूपनाटकस्य रचनां कृत्वा अनेकानि रूपाणि बिभ्रती सैव अभिनयमपि करोति । स्वयं कृतमभिनयमनेकरूपेण दृष्टवा मन्त्रमुग्धाऽपि सैव भवति । तत्कालमेव एतस्मात् स्वस्मात् तटस्थेयम् स्वात्मनिविश्रामं कुर्वती आस्ते। सर्वं कृत्वाऽपि सा किमपि न करोति। किमप्यकृत्वा च सा सर्वस्य कर्त्री भवति । सैव परमो भोगः परमश्च त्यागः । पक्षान्तरे सा समस्तभोगत्यागविवर्जिता केवला तिष्ठति । इयं सर्वत्र स्वप्रकाशते पक्षान्तरे च परमान्वेषणेनापि तस्या लेशमात्रमपि चिह्नं न परिलक्ष्यते । अनन्तमहिमामयीयं चितिः ज्ञानिनां ब्रह्म, योगीनां परमात्मा भक्तजनानां च भगवती अस्ति । वाङ्मनोऽतीतापि सा सर्वेन्द्रियवेद्या सर्वभावगम्या चास्ति । इयं चितिः सत्स्वरूपा सती स्वप्रकाशा अर्थात् अवबोध स्वरूपा । अर्थात् इयं स्वात्मनः स्वप्रकाशत्वं सुष्ठु अवबुध्यते । अयमवबोधः विमर्शनाम्ना व्यवह्रियते। अयं च विमर्शः प्रकाशस्य स्वभावः । तदुक्तम् -

स्वभावमवभासस्य विमर्शं विदुरन्यथा ।

प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादि जडोपमः ॥ (ई.प्र.)

यदा सा स्वकीयं विश्वमयं रूपं विमृशति तदानन्दोच्छलिता भवति । तस्यां प्रकाश विमर्शौ सहैव वर्त्तमानौ शाश्वतौ वर्त्तेते । एतदेवास्याः स्वातन्त्र्यं यदियं स्वसत्तायाः स्वशक्तिसत्तायाश्चावबोधं सर्वदा कुर्वाणाऽस्ति । इदं विश्वमपि

तद्विमर्शस्यैव परिणामः । तदुक्तं तन्त्रसारे -

अन्तर्विभाति सकलं जगदात्मनीह
यद्वद् विचित्ररचना मुकुरान्तराले ।
बोधः परं निजविमर्शरसानुवृत्त्या
विश्वं परामृशति नो मुकुरस्तथा तु ॥

तच्च विश्वं परमसत्तायां नित्यं विराजमानमस्ति । सहैव अस्या विश्ववर्त्तमानताया बोधोऽपि तस्या अन्तर्नित्यं जागर्त्ति । एतस्मात् कारणात् सा निग्रहसृष्ट्यादि पञ्चकृत्यै नित्यं कुरुते । तत्रस्वेच्छया स्वयं स्वरूप गोपनं निग्रहः । पश्चात् सृष्टिस्थितिसंहारानन्तरं पुनः स्वरूपे प्रतिष्ठा अनुग्रहः । इमानि पञ्चकृत्यानि तस्यां चितौ तत्स्वातन्त्र्यवशात् अनवरतं प्रचलन्ति । अस्य कृत्यपञ्चकस्य नास्ति किञ्चन कारणं न चापि किञ्चनोद्देश्यम् । एतद्धि तस्याः स्वभावः स्वातन्त्र्यं वा । यतो हि सा सर्वशक्तिसम्पन्ना । यथाऽभिनयस्तस्याः स्वभावस्तथैवास्माद-भिनयात्तारस्थ्यमपि तस्याः स्वभावः । किमधिकं वर्णयामो यत्किमपि दृश्यतेऽस्ति तत्सर्वं तस्याः चित्तेः स्वातन्त्र्यस्य माहात्म्यम् ।[१५]

इयतावर्णनेनेदमायातं यत् चैतन्यस्य स्वातन्त्र्यमेव सर्वोपरि । स्वे महिम्नि प्रतिष्ठितः[१६] इत्युपनिषद् वाक्यमपि स्वातन्त्र्यमेव संकेतयति यतो हि स्वातन्त्र्यमेव तस्या महिमा यस्मिन् स परमेश्वरः प्रतिष्ठितः । पूर्वमुक्तं यदेतद्विश्वं चैतन्य-स्योन्मीलनम्। चैतन्यमेव स्वभित्तौ आत्मानं प्रतिबिम्बितं कृत्वा विश्वमाभासयति । यदाह -

चिदात्मैवहि देवोऽन्तःस्थितामिच्छावशाद् बहिः ।
योगीवनिरुपादानमर्थजातं प्रकाशयेत् । (ई.प्र.१.५.७)

तथा

अस्थास्यदेकरूपेण वपुषा चेन्महेश्वरः ।
महेश्वरत्वं संवित्त्वं तदत्यक्षत् घटादिवत् ॥ (तं.आ. ३.१००)

सामान्यव्यवहारे एकं बिम्बं भवति यथा मुखम् । तस्य प्रतिबिम्बं दर्पणाद्याधारे दृश्यते। दर्पणाध्याधारं विना बिम्बप्रतिबिम्बभावस्य कल्पनाऽपि कर्त्तुं न शक्यते । किन्तु परमसत्ता चितिरेकाऽद्वितीयैव । सा स्वस्वातन्त्र्यात् स्वस्यामेव स्वात्मानं प्रतिबिम्बयति । तत्र कोहि नाम बिम्बप्रतिबिम्ब भावः कथं च परमात्मा बिम्बप्रतिबिम्बरूपेणात्मानामाभासयति ? अत्र अभिनवगुप्तपादाचार्याः -

अतोऽसौ परमेशानः स्वात्मव्योमन्यनर्गलः ।
इयतः सृष्टिसंहाराऽम्बरस्य प्रदर्शकः ॥
निर्मले मुकुटे यद्वद् भान्ति भूमिजलादयः ।
अभिन्नास्तद्वदेवस्मिंश्चिन्नाथे विश्ववृत्तयः ॥ (तं. आ. ३.३.४)

अयं चैतन्यस्वरूपः परमात्मा व्योमवन्निरर्गलोऽसीमविस्तारवान् । यथा स्वच्छे दर्पणे भूमिजलादयः सहैव प्रतिबिम्बिता भवन्ति तथैवेतन्निखिलमपि विश्वं तस्मिन् स्वच्छे चित्परमेश्वरे सदैव युगपद् भासते । दर्पणदृष्टान्तस्तु परमेश्वरस्य दर्पणगतस्वच्छतानामकभूयोधर्मवत्त्वमेवातिदिशति नेतरान् धर्मान्। यदाहुः -

न देशो नो रूपं न च समययोगो न गरिमा
न चान्यान्यासङ्गो न च तदपहानिर्निधनता ।
न चावस्तुत्वं स्यान्न च किमपि सारंनिजमिति
ध्रुवं मोहः शाम्येदिति निरदिशद् दर्पणविधिः ॥ (तं. आ. ३.२३)

एतेनेदमायातं यद् विश्वमिदं चैतन्ये दर्पण प्रतिबिम्बन्यायेनावस्थितम् न तु तदतिरिक्ततया बहीरूपत्वेन वस्तु सत् । स्वच्छातातिशयान्मुकुर भूतेऽस्मिन् विश्वात्मके चैतन्ये आत्मनः प्रतिबिम्बं ददातः संविन्नाथः युक्त्यनुभवोप-पादितत्त्वात् निरवद्यां स्वात्माभिन्नाताम् विश्वरुपताम् भासयति । तेन निखिलमिदं जगत् चैतन्यात्मनः परमेश्वरस्यैवैकस्य रूपम् । तथा च

यथा च गन्धरूपस्पृग्रसाद्याः प्रतिबिम्बिताः ।
तदाधारोपरागेण भान्ति खङ्गे मुखादिवत् ॥
तथा विश्वमिदं बोधे प्रतिबिम्बितमाश्रयेत् ।

प्रकाशत्वस्वतन्त्रत्वप्रभृतिं धर्मविस्तरम् ॥(तं आ. ३.४५.४६)

यथा खङ्गमुकुटतैलादौ प्रतिबिम्बितं मुखं तेषाम् खङ्गादीनां दैर्ध्यादिधर्मान् आत्मनि अधास्यति तथेदं विश्वं तस्मिंश्चैतन्ये प्रतिबिम्बितं सत् तस्य प्रकाशत्व स्वतन्त्रत्वचैतन्यादि धर्मान् स्वात्मन्यारोपयति । अर्थात् स्वतन्त्रत्वप्रकाशत्वादि रूपतां भजते । प्रकाशातिरिक्तत्वे हि विश्वस्य स्वयमप्रकाशत्वाज्जडत्वं स्यात् ।

पूर्वमुक्तम् यदनन्ते नित्ये सदात्मनि तत्त्वे प्रथमं स्पन्दनं चैतन्यं । अस्माच्चैतन्यादुद्भूतं द्वितीयं चैतन्यं प्रथमे चैतन्ये स्वस्वरूपं विमृशति आनन्दरूपतां च याति । इदमेव चैतन्यस्य प्रतिबिम्बनम् । लोकव्यवहारेऽपि वयम् तदैवानन्दमनुभवामः यदा पत्नीपुत्रादि रूपे सजीवेऽथवा चित्रकलादौ निर्जीवे आत्मनः प्रतिबिम्बं पश्यामः । नानारूपेण दृश्यमानमिदं विश्वमुत्पत्तिदृशा तस्या एव चैतन्यात्मकसत्तायाः प्रतिबिम्बम् । यथा दर्पणादिगतं प्रतिबिम्बं दर्पणं विहायान्यत् किञ्चिदपि नास्ति तथैव चैतन्ये प्रतिबिम्बितं विश्वं चैतन्यं विहाय न किमपि वस्त्वन्तरं सत्तान्तरं वा । यथा दर्पणेऽस्मत्प्रतिबिम्बस्य बोधोऽस्माकं मनसि जायते तथैवस्य स्वसृष्टस्य विश्वस्य बोधः परमासत्तानुभवति । अयं बोध आभास इति कथ्यते । यथा समुद्रे उत्पध्यमाना अनन्तरूपेण आवर्त्तबुद्बुद तरंङ्गादय अनन्तरूपैर्लोकानां बुद्धिविषया भवन्ति तथैवेदमनन्तं विचित्रं विश्वं तस्यां परायां चिति तस्या एवांवभासन्ते । एतदन्तवैचित्र्यानन्तरूपेणाभासनमपि तस्यैव चैतन्यस्य लीलाविलासः । यथा चित्ते अन्यत्रसंलग्ने दर्पणगतप्रतिबिम्बस्य बोधो न भवति नास्ति तथा स्थितिः चिदात्मिकायाः सत्तायाः । तत्र प्रतिबिम्बिता सर्वेऽपि पदार्थाः समस्तं वा विश्वं तस्यां निरन्तरं शाश्वतं चाभासते । तस्माध्यथा चिदात्मिका परमसत्ता नित्या यथार्था च तथैव तस्यां प्रतिबिम्बान्याभासाश्चापि नित्यानि ।

इदं चैतन्यं विश्वावभासस्य हेतुः । सांख्यनये विश्वं पञ्चविंशति तत्त्वात्मकम् । तानि च तत्त्वानि पृथिव्यादिपञ्चमहाभूतादारभ्य पुरुषान्तानि । तेषु तत्त्वेषु पुरुषः प्रकृतिश्चेत्ति तत्त्वद्वयं मूलभूतम् । तान्त्रिकवाङ्मये षटत्रिंशत् तत्त्वानि ।

सांख्यसम्मतपञ्चविंशतितत्त्वैः सह एकादशान्यानि तत्त्वानि सन्ति । तद्याथा - माया, तस्या पञ्चकञ्चुकानि (=कलाविद्या रागःकालोनियतिः) इति षट् शुद्धविद्या, ईश्वरः, सदाशिवः, शक्तिः, अनश्रित शिवः इति पञ्च । एवं पञ्चविंशति + षट् + पञ्च इति षट्त्रिंशत्तत्त्वानि तदात्मकं च विश्वम् । यथा मालास्थमणिगणेषु सूत्रं सर्वत्रानुस्यूतं भवति यथा वा नानाविधेषु मिष्ठान्नेषु सितशर्कराऽनुस्यूता भवति तथैवानाश्रितशिवादारभ्य पञ्चमहाभूतपर्यन्तं सर्वत्र चैतन्यमनुस्यूतं वर्त्तते । यथा लूता स्वनिर्मिततन्तु जालस्य निमित्तमुपादान-मुभयात्मकमपि कारणं भवति तथैवेदं चैतन्यं षट्त्रिंशत्तत्त्वात्मकस्य विश्वस्याभिन्ननिमित्तोपादानम् । क्वचिदिदं साक्षान्निमित्तं क्वचिच्च परम्परया । तयानाश्रितशिवादारभ्य शुद्धविद्यापर्यन्तानि तत्त्वानि साक्षान्निर्मिमीत इदं चैतन्यम् । मायातश्चारभ्यक्षित्यादिपर्यन्तं श्री अनन्तनाथभट्टारकद्वारा सृष्टिं विदधाति । चैतन्यं परमसत्ताया अन्तरङ्गशक्तिरिति प्रागवोचाम ।एतदेव यदा आत्मानं संकोचयति तदा 'अहं', 'इदम्' इत्यात्मकम् विश्वं प्रमातृप्रमेय प्रमाणेति त्रिविधरूपेण विकासितं भवति । क्वचित्सदाशिवादितत्त्वे 'अहन्तायाः' प्राधान्यम् भवति क्वचिच्चमायादितत्त्वे 'इदन्तायाः' । शुद्धविद्यातत्त्वे अहन्तेदन्ते समधृततुलापुटन्यायेन समानं प्राधान्यमावहतः । तत्रतत्त्वेषु मन्त्रमहेश्वर - मन्त्रेश्वर - मन्त्र - विज्ञानकला - अकल - सकलेति प्रमातारो भवन्ति । प्रमेयं च अहमतिरिच्य घटपटाध्यात्मकं निखिलं विश्वम् । प्रमाणानि च प्रत्याक्षानुमाना-गमात्मकानीति सर्वत्रशास्त्रेषु चर्चितानीतिलेखविस्तारभयान्नात्र विशदीकृतानि ।

इदं चैतन्यं यदा स्वं रूपं गोपयित्वा संकोचं गृह्णाति तदाऽस्य द्वयीगतिः - कदाचिदुल्लसितमपि संकोचं गुणी कृत्येदं चित्प्राधान्येन स्फुरति : कदाचिच्च संकोचप्रधानतयोल्लसति । प्रथमे पक्षे तद्विज्ञानाकलः द्वितीये च पक्षे विद्याप्रमाता इत्युच्यते । यदा तस्मिञ्चैतन्ये सङ्कोचस्य घनीभूतत्वं प्रसरति तदा तदेव चैतन्यं नीलसुखादिरूपेणोल्लसति । अर्थात्, स्वातन्त्र्यात्मा चितिशक्तिरेव ज्ञानत्रियामाया-रूपमाधाय पशुदशायाम् संकोचप्रकर्षात् सत्त्वरजस्तमःस्वभावात्मकचित्तरूपेण स्फुरति[१७] । इदं चित्तं बुद्धिर्वा ज्ञानाज्ञानयोराश्रयभूता । तत्र अज्ञानं नाम न ज्ञानाभावः (किन्तु अल्पं ज्ञानं) । नञः अल्पार्थे प्रयोगात् । न केवलं बुद्धिरेव ज्ञानाज्ञानयोराश्रयः

किन्तु स्वयं चैतन्यमपि संकोचवशाद् गृहीतपशुभावं ज्ञानाज्ञानयोराश्रयभूतं । एवं ज्ञानमज्ञानमुभयमपि द्विविधम् - बौद्धं पौरुषं च। तत्र उभयमप्यज्ञानं सृष्टिकारणं ज्ञानं चोभयं मोक्षाधायकम् [१८]। जागतिक वस्तूनि शिवरूपाणि सन्तीत्यननुसन्धाय तानि घटपटादिरूपाणि सन्ति इत्यवधारणा बौद्धमज्ञानम् । इदं बौद्धमज्ञानं बौद्धज्ञानेन नश्यति। यदा जीवः स्वमनसि जागतिकवस्तूनि शिवस्वरूपाण्यवबुध्यते तदा ज्ञेयं यद् बौद्धाज्ञानं विनष्टम् । अयमज्ञाननाशः शास्त्राणामभ्यासेन गुरुपदेशेन वा जायते । आत्मनः जीवरूपेण बोधः पौरुषमज्ञानं कथ्यते । इदमज्ञानं दीक्षया नश्यति । बौद्धज्ञानमपि प्रकारान्तरेण पौरुषाज्ञानमेव । यदा गुरुकृपान्वितदीक्षया शिष्योऽनुगृहीतो भवति तदारभ्य शिष्यान्तर्गतं मलं पौरुषमज्ञानं वा शिथिलायते । तात्पर्यंत्विदमस्ति यत् पुरुषस्य बुद्धिरात्मा चोभयमपि मलरहितौ भवेताम् । बौद्धज्ञानेन बौद्धाज्ञानं नश्यति । स्फीतबुद्धिः पुरुषः गुरुभक्तिशास्त्राभ्यासप्रवणः सन् दीक्षारूपां गुरुकृपामाप्नोति । दीक्षया पौरुषमज्ञानं नश्यति । बौद्धं ज्ञानं ज्ञानमिति कथ्यते पौरुषं च ज्ञानं विज्ञानम्। ज्ञानं विज्ञानस्य प्राप्तौ हेतुभूतम् । तत्र

भूमिरापोऽनलं वायुः खं मनो बुद्धिरेव च । (भ.गी. ७.५०) इत्युक्तनीत्या यत्किञ्चिदस्मिन् विश्वस्मिन् दृश्यतेऽनुभूयते च तत्सर्वं वासुदेवमयं वासुदेवात् प्रादुर्भूतं तथैव स्थितं तस्मिन्नेव लयं याति इति वस्तुगतिः । किन्त्वेतादृग्बुद्धौ सत्यामपि 'अहमन्यः, वासुदेवमयेभ्यो वस्तुभ्यः पृथक् तेषां साक्षी, तानि सर्वाणि वासुदेवमयान्यनुभवामि' इति बुद्धिज्ञानं । एवं दृढ़निश्चयस्य सततमभ्यासम् कुर्वतो ज्ञानिनो हृदये परमेश्वरकृपावशात् संविन्नामकं चैतन्यमुदेति । अत्रेदमवधेयम् - परमात्मनिस्तिस्रोशक्तयो राजन्ते - ह्लादिनी, साधिनी संविच्च। यद्यपि मूलत एतच्छक्तित्रयं चैतन्यमेव तथापि भेददृष्ट्या एतास्तिस्रः स्वीक्रियन्ते। तया यदा संविच्छक्तेरुदयो भवति तदा वासुदेवः सर्वम्[१९] इति मतिरुदेति । एषा या मतिः सा ज्ञानम् एतदन्तरं यदा 'अहं सर्वम्' अथवा 'अहं वासुदेवः (शिवः) सर्वम्' इति बुद्धिरपि न किञ्चित् पृथक् वस्तु किन्त्वहमेव इत्याभासो जायते तदा एष आभासो विज्ञानमिति कथ्यते। यच्चेदं ज्ञानं यच्च विज्ञानं तत् सर्वं चैतन्यमेव किन्तु संकुचितं न तु पूर्णम् ।

चैतन्यस्य पूर्णत्वं कदायाति - इतीदानीं विचार्यते - जीव अनादिकालात् पाशैरुपनिबद्धः । पाशाश्चाशुद्धविकल्पस्वरूपाः । ननु अशुद्धविकल्पाः के ? इति जिज्ञासायामुच्यते - घटपटादयः पदार्थाः सद्भूताः वासत्वाः इति धारणा अशुद्धविकल्पः । एतैरशुद्धविकल्परूपैः पाशैरूपनिबद्धं चैतन्यं स्वरूपगोपनात् प्रसुप्तामिव वर्त्तते । यदासाधको दीक्षादिना परमात्मनोऽनुग्रहं प्राप्नोति तदा प्रसुप्तमिदं चैतन्यं । चितिशक्तिर्वा जीवस्य स्पर्शनं करोति । ततआरभ्य जीवस्य विकल्पदृष्टी परिवर्तनम् प्रारभ्यते । चिच्छक्तिर्जाग्रदवस्थां प्राप्य कालं ग्रसितुमारभते यतो हि काल एव जीवेषु विकल्पनां प्रवर्त्तको जनको वा । अयम् कालग्रसनव्यापारः क्रमशो भवति। अस्मिन् क्रमे जीवः सर्वप्रथमं प्रमेयाणां शुद्धिमनुभवति। यावत् प्रमेयशुद्धिर्नभवति तावत् जीवानां रूपान्तरणमसंभावि। प्रमेयशुद्धेः साधारणं लक्षणमिदमस्ति यज्जीव इदं विश्वं बहिष्ट्वेन स्थितं नानुभवति किन्तु स्वात्मनि संस्थितमनुभवति । यावद्देहात्माभिमानं तिष्ठति न तावच्चिच्छक्तेर्जाग्रदवस्था नचैव प्रमेयशुद्धिः। यदा जीवः इदं शरीरमन्यत्, आत्मनः पृथक् - इत्यनुभवन्नास्ते तदा विश्वं बाह्यरूपेणस्थिते न प्रतीयते किन्त्वात्मनि स्थितम् । बाह्याभासस्य निवृत्तिरेव प्रमेयशुद्धिः ।

प्रमेयशुद्धौ सत्यां बाह्ये वस्तुतः स्थितमपि, अन्यैर्बाह्यत्वेन बुध्यमानमपि विश्वं साधकस्य कृते न बहिः स्थितम् । प्रतीयते यत् इदं विश्वं ममाभ्यन्तर एवास्ति । यथा दर्पणे प्रतिभासमानाः पदार्थाः दर्पणादतिरिक्तत्वेन प्रतीयमाना अपि न वस्तुतो दर्पणादतिरिक्ताः प्रत्युत दर्पण एव विश्रान्ताः प्रतीयन्ते तथैव चैतन्यस्य प्रथमोन्मेषे जगतो बाह्याभासो निवर्तते। प्रमेयस्य बोधः सन्नपि आभ्यन्तररुपेण भवति न तु बाह्य रूपेण । इदं जाग्रच्चैतन्यं बुभुक्षुरिव प्रथमं बाह्यं जगत् आत्मसात्करोति । इदमेवानुग्रहशक्तेः प्रथमं सोपानम् । यथाहुः शंकराचार्यपादाः -

'विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतम्' इति । अत्रेदं तात्पर्यम् - जगतो लोपोवस्तुतो न भवति । तत्रैव तिष्ठति । किन्तु तस्य भानमिन्द्रियग्राह्यरूपेण न भवति प्रत्युदात्मस्वरूपान्तर्गतत्वेन भवति । एवमियं चिच्छक्तिः बाह्यं जगद् विषयरूपेण ग्रसित्वा तृप्तिमायाति । अनया प्रक्रियया विषयाणाम् विषयत्वं निवर्त्तते । फलतः

जीवस्य कृते विषयोपभोगनामकं किमपि वस्तु नावशिष्यते । तदानीं विषयज्ञानं रागात्मकं भवति तच्च पराशक्तिः निर्विकल्पकभावेनानुभवति। तान्त्रिकदृष्ट्याऽयं वीरभोग इति ज्ञायते । अयं च भोगो जाग्रत् स्वप्न सुषुप्तिदशास्वप्यनिर्वर्तमान-स्तुरीयदशारूपः । इयमेव वास्तवी भगवदाराधना या सर्वास्वप्यवस्थास्वेकरूपेण प्रचलति । एतस्यां दशायां साधकस्य प्रत्येकं कर्म भगवदाराधनं भवति । यथाहुर्भगवत्पादशंकराचार्याः -

> आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
> पूजा ते विषयोपभोगरचना निद्रासमाधिस्थितिः ।
> सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणिसर्वा गिरः
> यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥

अस्य भोगस्य समाप्तौ परमा तृप्तिरुदेति । फलतः साधकस्यान्तर्मुखी दशाविर्भवति। भोगसाधनभूतः समस्तेन्द्रियवर्गः करणेश्वरीसमूहो वा परमतृप्तः सन् चैतन्येनालिङ्गितः तेनाभिन्नतां प्राप्नोति । तस्यामवस्थायां विषयोपभोगतदाकाङ्क्षाभ्यां रहितः करणवर्गः प्रमातृरूपताम् प्राप्नोति । अत्र केवलं स्वरूपानुसन्धानमवशिष्यते। स्वरूपानुसन्धानं सातत्येन कुर्वन् योगी परप्रमातृभावं प्राप्नोति । इयमेव परमशिवदशा। परचैतन्यस्य दशा द्विविधा - कृशा पूर्णा च । यदा कायरूपा महाशक्तिर्निवृत्तप्राया भवति एकमात्रममा-कलावशिष्यते तदा चैतन्यस्य कृशा दशा । यदा च सर्वाः कलाः पूर्णरूपेण विकासिता भवन्ति तदा तस्य पूर्णा दशा । प्रमेयशुद्ध्यन्तरं प्रमाण शुद्धिस्तदनन्तरं च प्रमातृशुद्धौ सत्यामेषा पूर्णा दशोदेति । कौलमार्गीया द्वैतशक्तिसाधका एवैनां निर्वक्तुं शक्नुवन्ति । जागरणस्य पूर्णदशायां सर्वं चिन्मयं भवति । इयं महाशक्तेः पूर्णावस्थाऽस्ति । कालस्योर्ध्वं महाकालस्तदूर्ध्वं च पराशक्तिः परमासंवित् परमं चैतन्यं वा विराजते । एतावतावर्णनेनेदमायातं यत् पूर्णं चैतन्यं स्व स्वातन्त्र्यात् स्वस्मिन्नेव सत्त्वे संपूर्णं विश्वमाभास्य तत्रैव लीनतां नयति। अनेनैवाशयेन छान्दोग्येउक्तम् - 'सर्वं खल्विदं ब्रह्म तज्जलान् इति शान्तमुपासीत' (३.१४.१.)। यतश्च चैतन्यं

परमसत्ताया अन्तरङ्गा शक्तिन्दश्च बहिरंगा (यथा पूर्वमेवोक्तम्) तस्मादिदं परमासत्तात उद्भूतं जगत् चिदानन्दात्मकमिति निश्चप्रचम् । तथाचोक्तं तैत्तिरीयोपनिषदि - 'आनन्दाध्येव खल्विमानि भूतानि जायन्ते, अनन्देन जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्ति । आनन्दं ब्रह्म' । इति । तस्मात् इदमवधेयं यत् -

पूर्णमदः (चैतन्यम्) पूर्णमिदं (विश्वम्)
पूर्णात् (चैतन्यात्) पूर्णम् (विश्वम्) उदच्यते ।
पूर्णस्य (विश्वस्य) पूर्णं (चैतन्यम्) आदाय
पूर्णम् (चैतन्यम्) एवावशिष्यते ॥

संकेतसूची -

ऐ.उ. - ऐतरेयोपनिषत् ।

बृ.उ. - बृहदारण्यकोपनिषत् ।

तै.उ. - तैत्तिरीयोपनिषत् ।

त. सू. - तत्त्वार्थसूत्र ।

श्वे.उ. - श्वेताश्वतरोपनिषत् ।

मु.उ. - मुण्डकोपनिषत् ।

सौ.ल. - सौन्दर्यलहरी ।

छा.उ. - छान्दोग्योपनिषत् ।

तं .आ. - तन्त्रालोक ।

ई.प्र. - ईश्वरप्रत्यभिज्ञा ।

प्र.हृ.सू. - प्रत्यभिज्ञाहृदयम् सूत्र ।

मा.वि.तं - मालिनीविजयतन्त्र ।

भ.गी. - भगवद्गीता ।

१. अयमात्माब्रह्म सर्वानुभूः (बृ.उ. २.५.१४)

२. विज्ञानमानन्दं ब्रह्म (बृ.उ. ३.८.२८)

प्रज्ञानं ब्रह्म (ऐ.उ. ६.३.)

३. तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम् ।

तत्स्यात् प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत् ॥

४. प्रदेश संहारविसर्गाभ्यां प्रदीपवत् (त.सू. ५.१६)

५. अयमात्मा ब्रह्म सर्वानुभूः (बृ.उ. २.५.१८.),

सत्यं ज्ञानमनन्तं ब्रह्म (तै.उ. २.१.१.),

विज्ञानमानन्दं ब्रह्म (तै.उ. ३.४.२८),

आनन्दो ब्रह्म (तै.उ. ३.६.),

स वा अयमात्मा ब्रह्म विज्ञानमयः (बृ.उ. ४.४.५),

प्रज्ञानं ब्रह्म (ऐ.उ. ३.३.),

इदं सर्व यदयमात्मा (बृ.उ. २.४.६)

६. नैव स्त्री न पुमानेष न चायं स्यान्नपुंसकः (श्वे.उ. ५.१०)

७. परमात्मस्वरूपं तु सर्वोपाधिविवर्जितम् ।

चैतन्यमात्मनो रूपं सर्वशास्त्रेषु पठ्यते ॥

तथा -

शिवोदेवः शिवा देवी शिवंज्योतिरितित्रिधा ।

आलिङ्गमपि तत्तत्त्वंलिङ्गभेदेन कथ्यते । (तत्त्वप्रकाश)

८. यथा एकं चित्तमेकस्मात् कोणतः दृष्टंसत् गजस्य चित्तं विपरीताच्च कोणतो दृष्टं सद् वृषभस्य चित्रं प्रतीयते तद्वत् ॥

९. शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं

न चेदेवं देवः न खलु शक्तः स्पन्दितुमपि ॥ (सौ.ल. १)

१०. मु.उ. ३.३.

११. नैव स्त्री न पुमानेष न चायं स्यान्नपुंसकः ।

यत् यत् शरीरमादत्ते तेन तेन स युज्यते ॥ (श्वे.उ. ५.१०)

१२. साक्षी चेता केवलो निर्गुणश्च । (श्वे.उ. ३.६.११)

१३. प्र.हृ.सू (१.२)

१४. प्र.हृ.सू. (१.३)

१५. निग्रहः, सुष्टिः, स्थितिः, संहारः, अनुग्रहः ।

१६. छा.उ. (७.२४.१)

१७. चितिरेव चेतनपदादवरूढा चेत्यसंकोचिनी चित्तम् । (प्र.हृ.सू. ५)

१८. इहतावत् समस्तेषु शास्त्रेषु परिगीयते ।

अज्ञानं संसृतेर्मूलं ज्ञानं मोक्षैककारणम् ( तं.आ. १.२२)

तथा -

मलमत्तानमिच्छन्ति संसाराङ्कुरकारणम् । (मा.वि.त. १.२३)

१९. बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।

वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥ (भ.गी. ७.४.)